# काव्यत्रयी – द्वितीय एवं तृतीय भाग

**डॉ. बलराम शुक्ल**
सहायक आचार्य (संस्कृत विभाग)
दिल्ली विश्वविद्यालय

## अरविन्दकाननसुगन्धि

तव चुम्बनेन रुचिरे! समभूदरविन्दकाननसुगन्धि मुखम् ।
तव दर्शनेन शुभदर्शनके! विहितामृताशनमिवाक्षियुगम्॥

स्पृशतस्सकृद् भवति वः शरदो नवनीतदिग्ध इव मेऽवयवः।
भवतस्तव स्मरणतस्सुतनो! मधुमाधवाविव मनोहृदये ॥

तव नाम वामनयने! गृणतो मधुधोरणीपरिगता रसना ।
अरविन्दवन्दितमिवेन्दुमुखि! त्वदपाङ्गसङ्गतशरीरमिदम्॥

तव चिन्तनेन मम चित्तमभूच्छतदीपदीपितमिवायतनम् ।
मृगनाभिवासितमिदं निखिलं तव वासनाभिरभितो भवति॥

तव केशवेशवशतो विशदे! जनिता निशा मम निशाततरा ।
अभिलाषतन्तुरतिदीर्घतरश्चरितं च मे सुरभितगन्धितरम् ॥

लपति त्वया च मयि मां परितः कविकालिदासकविता स्फुरति।
अधरीकृतान्यवचनस्फुरणा सरसा समस्तमधुरा ललिता॥

# मञ्जुभाषिणी

मधुराधरामलसुपल्लवोद्गतां हसितप्रसूननिकुरम्बसौन्दरीम् ।
नयनेन हस्तयुगलेन भूरिशो रदनच्छदेन विचिनोमि सुन्दरि! ॥

तव नेत्रयोर्लसदपाङ्गपङ्कजप्रकरावनद्धमनुरागसन्धितम् ।
जयमाल्यमेष रुचिरे! चिरादहं भुवनत्रयस्य विजयीव धारये ॥

शतकोटितीक्ष्णकरवालभीषणे निशितभ्रु! ते भ्रुयुगले ससाहसम्।
अपि वारितं मम तु मञ्जुभाषिणि! कुरुते पदानि हृदयं स्खलत्पदम्॥

स्मरणे तव स्मररणानुजीवने सुरवाटिकाविहरणानुहारिणि ।
हृदयं मदीयहृदयाधिनायिके! रमणाय मे स्पृहयते निरन्तरम् ॥

विरहव्यथाऽनिशविकासवासिता हृदये, तव स्थिरतया कदर्थिता।
पतति प्रगेऽश्रुभिरधो विलोचनात् कलपारिजातकुसुमावलिर्यथा॥

नवयौवनोदयविलासमाधुरी कविताऽमृताधिकरसा, सुधर्मिता ।
अधुनावधि त्रितयमर्जितं भवे त्वदपाङ्गपातविधये समर्पये ॥

प्रहिता मुदा परमशारदाम्बया बलरामशुक्लरचिता सरस्वती ।
जननीव पोषणपरा विदां भवेत् तनयान् मुदं च तनयेव मानसे ॥